गं॰स॰
१

श्रीगणेशाय नमः ॥ अगस्त्य उवाच ॥ ॐ विना स्नानेन गं
गायां नृणां जन्म निरर्थकं ॥ उपायांतरमस्त्यन्यद्येन स्नान
फलं लभेन्नृ ॥ १ ॥ अशक्तानां च पंगूनामालस्योपहतात्मनां
दूरदेशांतरस्थानां गंगास्नानं कथं भवेत् ॥ २ ॥ दानं वाथ व्र
तं वाथ मंत्रः स्तोत्रं जपोथ वा ॥ तीर्थांतराभिषेको वा देवतो
पासनं तु वा ॥ ३ ॥ यद्यस्ति किंचित्स्कंद गंगास्नानफलप्र
दं ॥ विधानांतरमंत्रेण तद्वद प्रणताय मे ॥ ४ ॥ नत्तानवेदस्कं

श्री
राम॰

फलं लभेन्नृ ॥ सर्वपापप्रशमनं सर्वविघ्नविनाशनं ॥ ७ ॥ सर्वस्तोत्र
जपाच्छ्रेष्ठं सर्वपावनपावनं ॥ श्रद्धयाभीष्टफलदं चतुर्वर्गसमृ
द्धिकृत् ॥ ८ ॥ सकृज्जपादवाप्नोति ह्येककृत्फलमुत्तमं ॥ सर्वतीर्थे
षु यः स्नातः सर्वयज्ञेषु दीक्षितः ॥ तस्य यत्फलमुद्दिष्टं त्रिकाल
पठनात्सकृत् ॥ सर्वव्रतेषु यत्पुण्यं सम्यक्चीर्णेषु वाडव ॥ ९ ॥ तत्
फलं समवाप्नोति त्रिसंध्यं नियतः पठेत् ॥ स्नानकाले पठेद्यस्तु
यत्र कुत्र जलाशये ॥ १० ॥ तत्र सन्निहिता नूनं गंगा त्रिपथगामिने

गं·म· गंगास्नानफलं ब्रह्मन् गंगायामेव लभ्यते। यथाद्राक्षाफ
२ लस्वादो द्राक्षायामेव नान्यतः ॥१०॥ अस्त्युपाय इहैवैकः स्ना
नेनाविकलं फलं ॥ स्नानस्य देवसरितो महागुह्यतमो मुने। ११
शिवभक्ताय शान्ताय विष्णुभक्तिपराय च ॥ श्रद्धालवे ला
स्तिकाय गर्भवासमुमुक्षवे ॥१२॥ कथनीयं न चान्यस्य कस्य
चित्केन चित्क्वचित् ॥ इदं रहस्यं परमं महापातकनाशनं ॥ श्र राम
महाश्रेयस्करं पुण्यं मनोरथकरं परं ॥ द्युनदीप्रीतिजनकं शि २

वसंतोयं सन्ततिः ॥१३॥ नाम्नां सहस्रं गंगायाः स्तवराजेषु शोभ
नं ॥ जप्यानां परमं जप्यं वेदोपनिषदां समं ॥१४॥ जपनीयं प्रय
त्नेन मौनिना वाचकं विना। शुचिस्थानेषु शुचिना सुस्प
ष्टाक्षरमेव च ॥१५॥ ॐ नमः शिवायै गंगायै ॥ स्कंद उवाच ॥ ॐका
ररूपिण्यजरातुलानन्तामृतस्रवा ॥ अत्युदाराभयाशो
कालकानंदामृतामला ॥१६॥ अनाथवत्सलामोघापांयो
निरमृतप्रदा ॥१७॥ अव्यक्तलक्षणा क्षोभ्यानवछिन्नापराजिता १८

ग॰सं॰ अनाथनाथाभीष्टार्थसिद्धिदानैकवर्द्धिनी॥ अणिमादिगुणा
३ धाराग्रगण्यपालीकहारिणी॥ ७॥ अचिंत्यशक्तिरनघाद्भुतरू
पाद्भुतहारिणी॥ अद्रिराजसुता होगयोगसिद्धिदा चतुरा॥ ८॥
अदृश्या शक्तिरसदानंदनतीर्था मृतोदका॥ अनंतमहिमा
पारानंतसौख्यप्रदान्नदा॥ ९॥ अशेषदेवतामूर्त्तिरदेवोत्तम
नर्त्तृपिणी॥ अविद्याजालशमनी सुप्रतर्क्यगतिप्रदा॥ १०॥ राम
अशेषविघ्नसंहर्त्री विशेषगुणगुंफिता॥ अज्ञानतिमिरज्यो ३

तिरनुग्रहपरायणा॥ ११॥ अभिरामानवद्यांग्यनंतसारा २४
कलंकिनी॥ आरोग्यदानैकवल्ली नापन्ना सिविनाशिनी
आश्चर्यमूर्त्तिरायुष्याख्यायाख्यार्यसेविता॥ आप्यायिना
प्रविद्यात्मा नानेदशसदायिनी॥ १२॥ आलस्यघ्नापदं
हंत्री ह्यानंदामृतवर्षिणी॥ इरावती इष्टदात्रीष्टा त्विष्टसूते फ
लप्रदा॥ १३॥ इतिहासश्रुतीज्याद्या विहसमंचत्शुभप्रदा॥ इला
शीलसमीड्येष्टा त्रिदिशापरिवंदिता॥ १४॥ ईलालंकारमाले

गं·स·
४

धात्रिंदिरारम्यमंदिरा॥ॐ दिंदिरादिसंसेव्यातीश्वरीश्वर
वल्लभा॥ॐ॥ईतिभीतिहृदेव्याचत्वोनीयचरित्रभूता॥ॐ लू
ष्टशान्तिरुल्लष्टा ॐ ममं ॐलधारिणी॥ॐ॥ॐ दिन्तांबरमा
गीस्त्रोरगलोकविहारिणी॥ॐ दाविरोत्पलोक्कंभाॐ पहृच
रणद्भवा॥ॐ॥ॐ दत्त्वनस्तुतिहेतस्त्रोदारोत्साहप्रवर्द्धिनी॥ॐ द्वेग
मुल्लशमनीह्यल्लरश्मिसुताप्रिया॥ॐ॥ॐ त्पत्तिस्थितिस राम
हारकारिण्युपरिचारिणी॥ॐ ऊर्जं वहन्त्यूर्जधरोर्जावतीचो ४

र्मिमालिनी॥ऊर्ध्वरेतःप्रियोर्ध्वाध्वोर्ध्वर्मिलोर्ध्वगतिप्रदा
ऋषिवृंदस्तुतर्द्धिश्चऋणत्रयविनाशिनी॥ऋत॥ऋतंभर
र्द्धिदात्री चऋक्स्वरूपाऋजुप्रिया॥ऋक्षमार्गवहर्क्षावि
र्ज्यमार्गप्रदर्शिनी॥एधा॥एधिताखिलधर्मार्थाचैके
कामृतदायिनी॥एधनीयस्वभावैज्यात्वेजिताशेषपात
का॥ऐ॥ऐश्वर्यदैश्वर्यरूपाह्यैतिह्यंह्यैकाश्रुतिः॥ॐ ओजा
स्विन्योषधीक्षेत्रमोजोदोदनदायिनी॥ओ॥ओष्ठामृतौ

गं·स·
५ ब्रह्मद्रवीनौषधंभवरोगिणां ॥ उदार्यचंचुरोपेंद्रीनौ ग्रीही
मेयतूपिणी ॥ ३४ ॥ ऊर्ध्वगाधुवहीवश्वेवरमालांवुजेक्षणा ॥ ऊ
विकांबुमहायोनिरंयोदंथकक्षहारिणी ॥ ३५ ॥ ऊर्जमालाद्यु
ऊमतीत्वंगीकृतवषडानना ॥ ऊंधतीमिस्रहत्र्यंशुरंजनाद्भुत
नावती ॥ ३६ ॥ ऋद्धिः कल्याणकारिणीकाम्याकमलोत्पलगंधिनी
कुमुद्वतीकमलिनीकांतिकल्पितदायिनी ॥ ३७ ॥ कांचनाक्षी राम ५
कामधेनुः कीर्तिकृत्क्लेशनाशिनी ॥ क्रतुश्रेष्ठाक्रतुफलाक

र्मविभेदिनी ॥ ३८ ॥ कमलाक्षीक्लमहराकृशानुतपनद्युतिः
करुणार्द्राचकल्याणीकलिकल्मषनाशिनी ॥ ३९ ॥ काम
रूपाक्रियाशक्तिः कमलोत्पलमालिनी ॥ कूटस्थाकरु
णाकांताकूर्मयानाकलावती ॥ ४० ॥ कमलाकल्पलतिका
कालीकलुषवैरिणी ॥ कमनीयजलाकम्राकपर्दिसु
कपर्दगा ॥ ४१ ॥ कालकूटप्रशमनीकदंबकुसुमप्रिया ॥
कालिंदीकेलिललिताकलकल्लोलमालिनी ॥ ४२ ॥ कां

गं॰स॰ नलोकत्रयाकर्षुः कंदुजनवत्सला ॥ खड्गिनी खड्गधा
६ राभा खगा खंडेंदुधारिणी ॥४१॥ खेखेगामिनी खस्थी
खंडेंदुतिलकप्रिया ॥ खेचरी खेचरीवंद्या ख्यातिः ख्याति
प्रदायिनी ॥४२॥ खंडितप्रणताघौघा खलबुद्धिविनाशिनी ।
खातैनःकंदसंदोहा खड्गखट्वांगखेटिनी ॥४३॥ खरसंता
पशमनी खनिः पीयूषपाथसां ॥ गंगा गंधवती गौरी गंधर्व राम
नगरप्रिया ॥४४॥ गंभीरांगी गुणमयी गतातंका गतिप्रिया ॥ ग ६

णनाथांबिका गीता गद्यपद्यपरिष्टुता ॥४५॥ गांधारी गर्भश
मनी गतिभ्रष्टगतिप्रदा ॥ गोमती गुह्यविद्या गौर्गोप्त्री गगन
गामिनी ॥४६॥ गोत्रप्रवर्धिनी गुण्या गुणातीता गुणाग्रणी
गुहांबिका गिरिसुता गोविंदांघ्रिसमुद्भवा ॥ गुणनीयचरि
त्रा च गायत्री गिरिशप्रिया ॥ गूढरूपा गुणवती गुर्वी गौर
ववर्द्धिनी ॥४८॥ ग्रहपीडाहरा गुंद्रा गरघ्नी गानवत्सला ॥ घ
र्महंत्री घृतवती घृततुष्टिप्रदायिनी ॥४९॥ घंटारवप्रिया घो

ग·म· रौद्री च विध्वंसकारिणी ‖ प्राणान्तिकरी चोग्रा च नानंद्व
न्द्रिया ‖ ४४ ‖ ज्वालानलातूरिणि तजलाज्वृत पानक संनति ‖ चट
कोटिसमनीता पापहरिताशेषमंगला ‖ ४५ ‖ घृणावती घृणाभि
थित्य स्मरच्चूकनादिनी ‖ कुसृणा पिंजरतनुर्घर्घरी घर्घर
स्वना ‖ ४६ ‖ चंद्रिका चंद्रकांतं तु श्वेचला पापलघुति ‖ किम
पी विनिद्रपाचचंद्राणुत्तरतानना ‖ ४७ ‖ चापेयलोचना ना गम
तस्थावेणी चारुगामिनी ‖ चार्या च खिलनिलया विज्ञप्ति ७

त्रैरूपिणी ‖ ४८ ‖ चंद्रसूर्यस्वदनयुक्चंद्रवश्मवर्चनी या विरस्थिरा ‖
चारुचंपकमाला च मिनाशेषदुःकृता ‖ ४९ ‖ विदाकाश
वहाविंत्याच चम्चामरवीजिता ‖ वोरिताशेषदृजिनाचवि
ताशेषमंडुला ‖ ५० ‖ छेदिताखिलपापोघा कृयभ्रीक्कलह
रिणी ‖ छिन्नत्रिविष्टपतलाछेदिताशेषवंधना ‖ ५१ ‖ छि
रितामृतपारीणा छिन्नेनाछुदगामिनी ‖ छन्नीकृतनभोली
जाछदीकृतनिजामना ‖ ५२ ‖ जाड्यवीडाजगन्माता ज

ध्या जंबालवीचिका ॥ जया जनार्दनप्रीता जुषणीया जग
द्धिता ॥ जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी ॥ जीवजी
वातुलतिका जन्मिजन्मनिबर्हिणी ॥ २६ ॥ जाड्यविध्वंसनक
री जगद्योनिर्जलाविला ॥ जगदानंदजननी जलजा जल
जेक्षणा ॥ २७ ॥ जनलोचनपीयूषा जटातटविहारिणी
जयंती जंजपूकघ्नी जनितज्ञानविग्रहा ॥ २८ ॥ झल्लरीवा
द्यकुशला झलज्झालजलावृता ॥ झिंटीशवंद्या झांकारका

रिणी झर्झरावती ॥ २९ ॥ टीकिताखिलपाताला टंकिकैनो
द्रिपाटने ॥ टंकारनृत्यकल्लोला टीकनीयमहातटा ॥ ३० ॥ डंब
रप्रवहा डीनराजहंसकुलाकुला ॥ डमड्डमरुहस्ता च डामरो
क्तमहांडका ॥ ३१ ॥ ढौकिताशेषनिर्वाणा ढक्कानादचलज्ज
ला ॥ ढुंढिविघ्नेशजननी ढणड्ढुणितपातका ॥ ३२ ॥ तर्प
णी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ॥ त्रिलोकगोप्त्री तो
यश्री त्रैलोक्यपरिवंदिता ॥ ३३ ॥ तापत्रितयसंहर्त्री तेजोब

गं॰स॰ लविवर्धिनी॥ त्रिलद्यानारत्नीतारतारापतिकरार्चिता। ४२
५ त्रैलोक्यपावनी पुण्या तुष्टिदा पुष्टिरूपिणी। तस्मान्तेत्री
तीर्थमाता त्रिविक्रमपदोद्भवा॥ ५४॥ तपोमयी तपोरूपा तप
स्तोमफलप्रदा॥ त्रैलोक्यव्यापिनी तृप्तिस्तृप्तिकृत्तत्वरूपि
णी॥ ५५॥ त्रैलोक्यसुंदरी तुर्या तुर्यातीतफलप्रदा। त्रैलोक्य
लक्ष्मी स्त्रिपदी तथ्या तिमिरचंद्रिका॥ ५६॥ तेजोगर्भा तपः राम
सारा त्रिपुरारिशिरोगृहा॥ त्रयी स्वरूपिणी तन्वी तपनांग ५

जभीतिनुत्॥ ५७॥ तरीतरत्तिजा मित्रं तर्पिताशेषपूर्वजा
तुलाविरहिता तीव्रपापतूलतनूनपात्॥ ५८॥ दारिद्र्यदम
नी दक्षा दुःप्रेक्ष्या दिव्यमंडना॥ दीक्षावती दुरावाप्या द्राक्षाम
धुरवारिभृत्॥ ५९॥ दर्शितानेककुतुका दुष्टदुर्जयदुःखहृत्॥
दैन्यहृद्दुरितघ्नी च दानवारिपदाब्जजा॥ ६०॥ दंदशूकविष।
घ्नी च दारितानौघसंततिः॥ द्रुता देवद्रुमच्छन्ना दुर्वाराघवि
घातिनी॥ ६१॥ दमग्राह्या देवमाता देवलोकप्रदर्शिनी॥ देव

गं॰स॰ देवप्रियादेवीदिक्पालपददायिनी ॥ ८ ॥ दीर्घायुःकारि
१० णीदीर्घादोग्ध्रीहूयमानवर्जिता ॥ ९ ॥ गुप्तां तु वाहिनीदायादि
यादिव्यगतिप्रदा ॥ १० ॥ शूद्रेदीदीनशरणादेहिदेहनिवा
रिणी ॥ द्राघीयसीद्वायहन्त्रीदिव्यपानकसन्तति ॥ ११ ॥ दूर
देशान्तरचरीदुर्गमादेववल्लभा ॥ १२ ॥ हेतन्त्रीद्वि गाह्यादया
धारादयावती ॥ १३ ॥ दुरासदादानशीलाद्राविणीतुहि
तास्तुता ॥ देवदानवसंस्तुतिकर्त्रीउर्वुद्धिहारिणी ॥ १४ ॥ दा राम
१०

नसारदयासारदायावाभूमिविगाहिनी ॥ इष्टादृष्टफल
प्राप्तिदेवतानृत्यदंवदिता ॥ १५ ॥ दीर्घव्रतादीर्घदृष्टिदीप्ततो
यादुरालभा ॥ दंडयित्रीदंडनीतिदुष्टदंडधराचिता ॥ १६ ॥ दुरो
दरघ्नीदावीर्चिर्द्रवद्द्रव्यैकशेवधि ॥ १७ ॥ दीनसंतापशमनी
दात्रीदवथुवैरिणी ॥ १८ ॥ दरीविदारणपरादांतादांतज
नप्रिया ॥ दारितादिनरादुर्गादुर्गारण्यप्रचारिणी ॥ १९ ॥ धं
धर्मद्रवाधर्मधुर्याधात्रीधेनुर्धुर्य्यनिर्धुवा ॥ धेनुदानफल

गं·स स्वर्गाधर्मकामार्थमोक्षदा ॥ ५ ॥ धर्म्मोर्मिवाहिनी धुर्य्या
११ धात्रीधात्रीविभूषणा ॥ धर्मिणी धर्मशीला च धन्वि
कोटिकृतावना ॥ ६ ॥ ध्यात्रीपापहरा ध्येया धावनी धूतक
ल्मषा ॥ धर्मधारा धर्मसारा धनदा धनवर्द्धिनी ॥ ७ ॥ धर्मा
धर्मगुणच्छेत्री धत्तूरकुसुमप्रिया ॥ धर्मेशी धर्मशास्त्रज्ञा ध
नधान्यसमृद्धिकृत ॥ ८ ॥ धर्मलभ्या धर्मजला धर्मप्रसवध राम
र्मिणी ॥ ध्यानगम्यस्वरूपा च धरणी धातृपूजिता ॥ ९ ॥ धूर्दू ११

र्जटिजटासंस्था धन्या धीर्धारणावती ॥ नंदा निर्वाणजननी
नंदिनी नुन्नपातका ॥ १० ॥ निषिद्धविघ्ननिचया निजानंदप्र
काशिनी ॥ नभोंगणचरी नीतिर्नम्या नारायणीनुता ॥ ११ ॥ नि
र्मला निर्मलाख्याना नाशिनी तापसंपदां ॥ नियता नित्यसु
खदा नानाश्चर्यमहानिधिः ॥ १२ ॥ नदी नदसरोमाता नायि
का नाकदीर्घिका ॥ नष्टोद्धरणधीरा च नंदना नंददायिनी [illegible]
निर्णिक्ताशेषभुवना निःसंगा निरुपद्रवा ॥ निरालंबा निः

गं॰स॰
१२

प्रपंचानिर्णाशितमहामला ॥ ॥ निर्मलाज्ञानजननीनिः
शेषप्राणितापहृत ॥ नित्योत्सवानित्यतृप्तानमस्कार्या
निरंजना ॥ ॥ निष्ठावतीनिरातंकानिर्लेपानिश्चलात्मिका
निरवद्यानिरीहाचनीललोहितमूर्द्धगा ॥ ॥ नंदिभृंगिगणस्
तुत्यानागानंदानगात्मजा ॥ निःप्रत्यूहानाकनदीनिरयार्णव
दीर्घनौः ॥ ॥ पुण्यप्रदापुण्यगर्भापुण्यापुण्यतरंगिणी ॥ पृथुः राम १२
पृथुफलापूर्णाप्रणतार्तिप्रभंजिनी ॥ प्राणदाप्राणिजने

नीप्राणेशीप्राणरूपिणी ॥ पद्मालयापराशक्तिःपुरजि
त्परमप्रिया ॥ ॥ परापरफलप्राप्तिःपावनीचपयस्विनी
परानंदाप्रकृष्टार्थाप्रतिष्ठापालनीपरा ॥ ६ ॥ पुराणपठि
तापीताप्रणवाक्षररूपिणी ॥ पार्वतीप्रेमसंपन्नापशुपा
शविनाशिनी ॥ ७ ॥ परमात्मस्वरूपाचपरब्रह्मप्रकाशिनी
परमानंदनिष्यंदाप्रायश्चित्तस्वरूपिणी ॥ ८ ॥ पानीयरूप
निर्वाणापरित्राणपरायणा ॥ पापेंधनदवज्वालापापा

गं॰स॰ रिःपापनाममनुत्तमं॥४४॥परमैश्वर्यजननीप्रज्ञाप्राज्ञापरापरा
१३ प्रत्यक्षलक्ष्मीःपद्माक्षीपरव्योमामृतस्रवा॥४५॥प्रसन्नरू
पाप्रणिधिःपूताप्रत्यक्षदेवता॥पिनाकिपरमप्रीतापर
मेष्ठिकमंडलु॥४६॥पद्मनाभपदार्घ्येणप्रसूतापद्ममा
लिनी॥परर्द्धिदापुष्टिकरीपथ्यापूर्तिःप्रभावती॥४७॥
नानापीतगर्भघ्नीपापपर्वतनाशिनी॥फलिनीफलह राम
स्ताचफुल्लांबुजविलोचना॥४८॥फालितैनोमहाक्षेत्राफ १३

णिलोकविभूषणा॥फेनच्छलप्रणुन्नैनाःफुल्लकैरवगंधि
नी॥४९॥फेनिलाच्छांबुधाराभाफडुच्चाटितपातका॥फा
णितस्वादुसलिलाफांटपथ्याजलाविला॥५०॥विश्वमा
ताचविश्वेशीविश्वाविश्वेश्वरप्रिया॥ब्रह्मण्याब्रह्मकृद्ब्र
ह्मीब्रह्मिष्ठाविमलोदका॥५१॥विभावरीचविरजाविक्रां
तानेकविष्टपा॥विश्वमित्राविष्णुपदीवैष्णवीवैष्णवप्रि
या॥५२॥विरूपाक्षप्रियकरीविभूतिर्विश्वतोमुखी॥विपा

गं॰स शा विबुधी वेद्या वेदान्तरससस्रवा ॥१८॥ विद्यावेगवती वं
२४ द्याहं ह्लिली ब्रह्मवादिनी ॥ वरदा विप्रकृष्टा च वरिष्ठा च वि
शोधनी ॥१९॥ विद्याधरी विशोका च वयोवृंदनिषेविता ॥ व
हूदकावलवती व्योमस्था विबुधप्रिया ॥२०॥ वाणी वेद
वती वित्ता ब्रह्मविद्यातरंगिणी ॥ ब्रह्मांडकोटिव्याप्तांबुब्र राम
ह्महत्यापहारिणी ॥२१॥ ब्रह्मेशविष्णुरूपा च बुद्धिर्विभवव २४
र्धिनी ॥ विलासिसुखदा वश्या व्यापिनी च वृषारतिः ॥२२॥

वृषांकमौलिनिलया विपन्नार्तिप्रभंजिनी ॥ विनता विन
तावधूतनया विनयान्विता ॥२३॥ विपंचीवाद्यनिलया
वेणुश्रुतिविचक्षणा ॥ वर्चस्करी बलकरी बलोन्मू
लितकल्मषा ॥२४॥ विपाप्मा विगतातंका विकल्प
परिवर्जिता ॥ वृष्टिकर्त्री वृष्टिजला विधिर्विच्छिन्नबं
धना ॥२५॥ वस्तुरूपा चित्स्वरूपा वसुविघ्नविनाशकृत ॥ वसु
धारा वसुमती विचित्रांगी विभावसुः ॥२६॥ विजया विश्व

गं॰स॰
१४

बीजं च वामदेवी वरप्रदा ॥ वृषाश्रिता विषघ्नी च विज्ञा
नोर्म्यंशुमालिनी ॥ ४४ ॥ भव्या भोगवती भद्रा भवानी भूतभा
वनी ॥ भूतधात्री भयहरा भक्तदारिद्र्यघातिनी ॥ ४५ ॥ भुक्ति
मुक्तिप्रदा भेशी भक्तस्वर्गापवर्गदा ॥ भागीरथी भानुम
ती भाग्यं भोगवती भृतिः ॥ ४६ ॥ भवप्रिया भववेष्ट्री भूतिद
भूतिभूषणा ॥ भालोचना भावज्ञा भूतभव्यभवत्प्रभुः
भ्रान्तिज्ञानप्रशमनी भिन्नब्रह्माण्डमण्डपा ॥ भूरिदा भक्ति राम

सुलभा भाग्यवद्दृष्टिगोचरा ॥ ४७ ॥ भञ्जितोपप्लवकुलाभ
क्ष्याभोज्यसुखप्रदा ॥ भिक्षणीया भिक्षुमाता भावाभाव
स्वरूपिणी ॥ ४८ ॥ मन्दाकिनी महानन्दा माता मुक्तितरङ्गि
णी ॥ महोदया मधुमती महापुण्या मुदाकरी ॥ ४९ ॥ मुनि
स्तुता मोहहन्त्री महातीर्था मधुस्रवा ॥ माधवी मानिनी
मान्या मनोरथपथातिगा ॥ ५० ॥ मोक्षदा मतिदा मुख्या
महाभाग्यजनाश्रिता ॥ महावेगवती मेध्या महा महिमभू

गं॰ स॰ षण्णा ॥ मुक्ताकलापूर्ने पथ्यामनोनयननंदिनी ॥ ३४ ॥ महापा
१९ तकराशिघ्नी महादेवार्द्धहारिणी ॥ महोर्मिमालिनी मुक्ता
महादेवी मनोन्मनी ॥ ३५ ॥ महापुण्योदयप्राप्या मायातिमिर
चंद्रिका ॥ महाविद्या महामाया महामेधा महौषधं ॥ ३६ ॥ मालाध
रीमहोपाया महामंगलमंगला ॥ ३७ ॥ मार्त्तंडमंडलचरी महा
लक्ष्मीर्मदोज्झिता ॥ यशस्विनी यशोदा च योग्या युक्तात्म राम
सेविता ॥ ३८ ॥ योगसिद्धिप्रदा योज्या यज्ञेशा परिपूजिता ॥ यज्ञे १९

शी यज्ञफलदा यजनीया यशस्करी ॥ ३९ ॥ यमिसेव्या योगयो
नि योगिनी युक्तिबुद्धिदा ॥ योगज्ञानप्रदा युक्ता यमाद्यष्टां
गयोगयुक् ॥ ४० ॥ यंत्रिताघौघसंचारा यमलोकनिवारिणी
यातायातप्रशमनी यातनानामकृंतनी ॥ ४१ ॥ यामिनीश
हिमाम्भोदा युगधर्मविवर्जिता ॥ रेवती रतिकृद्रम्या रत्नग
र्भा रमा रतिः ॥ ४२ ॥ रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ॥
रत्नप्रासादगर्भा च रमणीयतरंगिणी ॥ ४३ ॥ रत्नार्चीरुद्ररम

ग॰स॰ रणी रागद्वेषविनाशिनी॥ रमा रामा रम्यरूपा रोगिजीवातुरू
१७ पिणी॥ ४७॥ रुचिकृद्रोचना रम्या रुचिरा रोगहारिणी॥ राजहं
सा रत्नवती राजत्कल्लोलराजिका॥ रमणीयकरूपा च रु
ग्जारी रोगशोषिणी॥ राका रंकार्त्तिशमनी रम्या रोलंबराविणी॥ ४८॥ रागिणी रंजितशिवा रूपलावण्यशेवधि॥ लोक
प्रसूर्लोकवंद्या लोलत्कल्लोलमालिनी॥ ४९॥ लीलावती राम
लोकभूमिर्लोकलोचनचंद्रिका॥ लेखस्रवंती लटभा लघु १७

गा लघुत्वहृत्॥ ५०॥ लास्यत्तरंगहस्ता च ललिता लयभंगिका
लोकबंधुर्लोकधात्री लोकोत्तरगुणार्जिता॥ ५१॥ लोकत्रय
हिता लोका लक्ष्मीर्लक्षणलक्षिता॥ लीला लक्षितनिर्वा
णा लावण्यामृतवर्षिणी॥ ५२॥ वैश्वानरी वासवेड्या वंध्य
त्वपरिहारिणी॥ वासुदेवांघ्रिरेणुघ्नी वज्रिवज्रनिवारिणी ५४
शुभावती शुभफला शांतिः शंतनुवल्लभा॥ शूलिनी शैश
ववयाः शीतलामृतवाहिनी॥ ५३॥ शोभावती शीलवती शो

गं॰स॰ खिलाशेषकिल्बिषा ॥ शरण्याशिवदाशिष्टाशरजन्म
१८ प्रसूःशिवा ॥ ४४ ॥ शक्तिःशशांकविमलाशमनस्वसृसंम
ता ॥ शमाशमनमार्गघ्नीशितिकंठमहाप्रिया ॥ ४५ ॥ शुचिःशु
चिकरीशेषाशेषशायिपदोद्भवा ॥ श्रीनिवासश्रुतिःश्री॥मती:
श्रीःशुभव्रता ॥ [illegible] ॥ ४६ ॥ शुभविद्याशुभावार्त्ताश्रुतानंदा
श्रुतिःस्तुतिः ॥ शिवेनरघ्नीशबरीशांबरीरूपधारिणी ॥ श्मशा राम
नशोधनीशांताशश्वच्छतधृतिःश्रुता ॥ शालिनीशालिशोभा १८

ढ्याशिखिवाहनगर्भभृत् ॥ ४८ ॥ शंसनीयचरित्राचशांतिता
शेषपातका ॥ षड्गुणैश्वर्यसंपन्नाषडंगश्रुतिरूपिणी ॥ ४९ ॥ षंढ
ताहारिसलिलास्त्यायन्नदनदीशता ॥ सरिद्वराचसुरसासुप्रभा
सुरदीर्घिका ॥ ५० ॥ स्वःसिंधुःसर्वदुःखघ्नीसर्वव्याधिमहौषधम्
सेव्यासिद्धिःसतीसूक्तिःस्कंदसूश्चसरस्वती ॥ ५१ ॥ संपत्तरंगि
णीस्तुत्यास्थाणुमौलिकृतास्पदा ॥ स्थैर्यदासुभगासौख्या
स्त्रीषुसौभाग्यदायिनी ॥ ५२ ॥ स्वर्गनिश्रेणिकासूक्ष्मास्वधास्वाहा

गं॰स॰ सुधाजला॥ समुद्ररूपिणी स्वर्गपी सर्वपातकवैरिणी॥ ९९५॥ स्मृता
१९ घहारिणी सीता संसाराब्धितरंडिका॥ सौभाग्यसुंदरी संध्या सर्व
सारसमन्विता॥ ९९६॥ हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी॥ हृ
ताघसंघा हितकृद्देला हेलाघगर्वहृत्॥ ९९७॥ हृष्टा हृष्टि हृदाह्ला
दीकारहृदयंगमा॥ हिमाचलसुता हैमी हृषीकेशपदोद्भवा॥ ९८
क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा॥ १००॥ इति नामस १००
हस्रं हि गंगायाः कलशोद्भव॥ कीर्तयित्वा नरः सम्यग् गंगास्नान १९

फलं लभेत्॥ सर्वपापप्रशमनं सर्वविघ्नविनाशनं॥ ७॥ सर्वस्तोत्र
जपाच्छ्रेष्ठं सर्वपावनपावनं॥ श्रद्धयाभीष्टफलदं चतुर्वर्गसमृ
द्धिकृत्॥ ८॥ सकृज्जपादवाप्नोति ह्येकक्रतुफलं मुने॥ सर्वतीर्थे
षु यः स्नातः सर्वयज्ञेषु दीक्षितः॥ तस्य यत्फलमुद्दिष्टं त्रिकाल
पठनात्सकृत्॥ सर्वव्रतेषु यत्पुण्यं सम्यक्चीर्णेषु वाडव॥ ९॥ त
त्फलं समवाप्नोति त्रिसंध्यं नियतः पठेत्॥ स्नानकाले पठेद्यस्तु
यत्र कुत्र जलाशये॥ १०॥ तत्र सन्निहिता नूनं गंगा त्रिपथगा मुने

गं॰स॰
२

श्रेयार्थी लभते श्रेयो धनार्थी लभते धनं ॥२०५॥ कामी कामान
वाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥ वर्षं त्रिकालपठनाच्छ्रद्ध
याश्रुचिमानसः ॥२०६॥ ऋतुकालाभिगमनादपुत्रः पुत्रवान्भ
वेत् ॥ नाकालमरणं तस्य नाग्निचौरहिंसाद्यं ॥२०७॥ नाम्नां सह
स्रं गंगाया यो जपेच्छ्रद्धया मुने ॥ गंगानामसहस्रं तु जप्त्वा ग्रामां
तरं व्रजेत् ॥२०८॥ कार्यसिद्धिमवाप्नोति निर्विघ्नो गेहमाविशेत् ॥ राम
तिथिवारर्क्षयोगानां न दोषः प्रभवेत्तदा ॥२०९॥ यद्वाजसभां व्रजेदे २

१८

तत्स्तोत्रं ग्रामांतरं नरः ॥ आयुरारोग्यजननं सर्वोपद्रवनाशनं ॥
सर्वसिद्धिप्रदं पुंसां गंगानामसहस्रकं ॥ जन्मांतरसहस्रेषु यत्पा
पं सम्यगर्जितं ॥२१०॥ गंगानामसहस्रस्य जपनात्तत्क्षयं व्रजेत् ॥
ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः ॥२११॥ तत्संयोगी भ्रूण
हंता मातृहा पितृहा मुने ॥ विश्वासघाती गरदः कृतघ्नो मित्रघा
तकः ॥२१२॥ अग्निदो गोवधकरो गुरुद्रव्यापहारकः ॥ महापात
कयुक्तोपि संयुक्तो ह्युपपातकैः ॥२१३॥ मुच्यते श्रद्धया जप्त्वा गंगा

गंस नामसहस्रकं॥ आधिव्याधिपरिक्लिष्टो घोरतापपरिप्लुतः॥ ८५
२१ मुच्यते सर्वदुःखेभ्यः स्तवस्यास्यानुकीर्तनात्॥ संवत्सरेण युक्तात्मा
पठन्भक्तिःपरायणः॥ ॥ अभीप्सितां लभेत्सिद्धिं सर्वपापैः प्र
मुच्यते॥ संशयाविष्टचित्तस्य धर्मविद्वेषिणोपि वा॥ ॥ दांभिक
स्यापि हिंस्रस्य चेतो धर्मपरं भवेत्॥ वर्णाश्रमपथीनस्तु काम
क्रोधविवर्जितः॥ ॥ यत्फलं लभते ज्ञानी तदाप्नोत्यस्य कीर्तनात्॥ राम
गायत्र्ययुतजप्येन यत्फलं समुपार्जितं॥ ॥ सकृत्पठनात्तत्स २१

म्यक्तद्शेषमवाप्नुयात्॥ गां दत्वा वेदविदुषे यत्फलं लभते कृती ९०
तत्पुण्यं सम्यगाख्यातं स्तवराजसकृज्जपात्॥ गुरुशुश्रूषणं कु
र्वन्यावज्जीवं नरोत्तमः॥ ॥ यत्पुण्यमर्जयेत्तन्नाग्वर्षं त्रिश्रवणां
जपन्॥ वेदपारायणात्पुण्यं यदस्य परिपठ्यते॥ ॥ तत्षण्मासे
न लभते त्रिसंध्यं परिकीर्तनात्॥ गंगायाः स्तवराजस्य प्रत्यहं प
रिशीलनात्॥ ॥ शिवभक्तिमवाप्नोति विष्णुभक्तोऽथवा भवे
त् यः कीर्तयेदनुदिनं गंगानामसहस्रकं॥ ॥ तत्समीपे स

गं॰स॰ हृत्स्थिता गंगादेवी सदा भवेत् ॥ सर्वत्र पूज्यो भवति सर्वत्र विजयी भ
२२ वेत् ॥ ४४ ॥ सर्वत्र सुखमाप्नोति जाह्नवीस्तोत्रपाठतः ॥ सदाचारी स वि
ज्ञेयः स शुचिस्तु सदैव हि ॥ ४५ ॥ कृतं सर्वसुराचार्यैः कीर्तयेद्यस्तु मानु
तिं ॥ तस्मिंस्तुष्टो भवेन्नूनं माता जाह्नवी नात्र संशयः ॥ ४६ ॥ तस्मात्सर्वप्रय
त्नेन गंगाभक्तः समर्चयेत् ॥ स्तवराजमिमं गंगाः शृणुयाद्यश्च वै
पठेत् ॥ ४७ ॥ श्रावयेद्यस्तद्भक्तान् दंभलोभविवर्जितः ॥ मुच्यते त्रि राम
विधैः पापैर्मनोवाक्कायसंभवैः ॥ ४८ ॥ तत्क्षणान्निःपापतामेति पि २२

तृणां च प्रियो भवेत् ॥ सर्वदेवप्रियश्चापि सर्वर्षिगणसंमतः ॥ ४९ ॥
अन्ते विमानमारुह्य दिव्यस्त्रीशतसंवृतः ॥ दिव्याभरणसंपन्नो दिव्य
भोगसमन्वितः ॥ ५० ॥ नंदनादिवने स्वैरं देववत्स प्रमोदते ॥ भुज्यमा
नेषु विप्रेषु श्राद्धकाले विशेषतः ॥ ५१ ॥ जपन्निदं महास्तोत्रं पितृ
णां तृप्तिकारकं ॥ यावंति तत्र सिक्थानि यावंतोंबुकणाः स्थिताः २३
यावंत्यब्दसहस्राणि मोदंते स्वपितामहाः ॥ यथा प्रीणंति पितरो
गयायां पिंडदानतः ॥ ५२ ॥ तथैव तृप्यंति श्राद्धे स्तवस्यास्यानुसं

गं॰स॰ श्रयात्॥ एतत्स्तोत्रं गृहे यस्य लिखितं परिपूज्यते॥ ५॥ नत्र पापभ
यं नास्ति शुचिस्तद्भवनं महत्॥ अगस्ते किं बहूक्तेन शृणु मे निश्चि
२३ तं वचः॥ द॥ संशयो नात्र कर्त्तव्यः संदिग्ध्यरि फलं न हि॥ यावंति
मर्त्ये स्तोत्राणि मंत्रजालान्यनेकशः॥ ७॥ तावंति स्तवराजस्य
गांगेयस्य समानि न तु॥ यावज्जन्म पठेद्यस्तु नाम्नेतत्सहस्र राम
कं॥ प॥ स कीकंठेष्वपि मृतो न पुनर्गर्भमाविशेत्॥ नित्यं नियम
वानेतद्यो जपेत्स्तोत्रमुत्तमं॥ ॥ अन्यत्रापि विपन्नः स गंगातीरे २३

मृतो भवेत्॥ ए॥ एतत्स्तोत्रवरं रम्यं पुरा प्रोक्तं पिनाकिना॥ र॥ वि
गं॰स॰ ष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदं॥ गंगास्नानप्रतिनिधि
२४ स्तोत्रमेतन्मयेरितं॥ सिस्नासुर्जाह्नवी तस्मादेतत्स्तोत्रं जपेत्सु
धीः॥ २२४॥ इति श्रीस्कंदपुराणे काशीखंडे स्कंदागस्त्यसंवादे श्री
गंगासहस्रनामस्तोत्रं संपूर्णं॥ श्रीरस्तु॥ संवत्॥ १८४६॥ फा॰ व
दि मंगलवार तृतीया श्री काश्यां मध्ये मणिकर्णिकासमीपे राम
गंगातीरे सिद्धविनायकालये संपूर्णं लिखे दिति भद्रं॥ २४